अहते शासनम् मुद्रित
पुस्तक सं०.....
आगत सं०.....
तिथि०.....
गुरुकुल कांगड़ी विश्वविद्यालय

Vidvan Mano Ranjani Series No. 5

VAIDÊHÎ-VIVASANAM

OR

THE EXILE OF SÎTÂ

COMPILED

WITH

PANCHAKRITYÂSHTAKA



BY

T. S. NARAYANA SASTRI, B.A., B.L.
High Court Vakil

CHECKED 1973
Initial .....

SECOND EDITION

MADRAS
PRINTED AT THE BRAHMAVADIN PRESS
1915

All rights Reserved]

[*Price As. 8*

Vidvan Mano Ranjani Series No 5.

Vaidehi-Vivasanam

OR

The Exile of Sita

WITH

Panchakrityashtaka

BY

T. S. NARAYANA SASTRIAR, B.A., B.L.,

HIGH COURT VAKIL,

MADRAS.

SECOND EDITION

PRINTED AT THE BRAHMAVADIN PRESS

MADRAS.

All Rights Reserved] 1915 [*Price Annas 8*

॥ वै दे ही वि वा स न म् ॥

नाटकपात्राणि

पुरुषाः

1. रामः—अयोध्याधिपति र्दाशरथिः, कथानायकः
2. लक्ष्मणः—रामस्य प्रेयानू भ्राता सौमित्रिः
3. सुमन्त्रः—रामस्य कुलक्रमागतः प्रधानसचिवः
4. जनकः—विदेहाधिपती राजर्षिः, सीतायाः पिता
5. कुशः
6. लवः
   —रामस्य सीतागर्भसम्भवौ वाल्मीकिशिष्यौ
7. चन्द्रकेतुः—लक्ष्मणस्य तनयः, मेध्याश्वरक्षिता
8. वाल्मीकिः—भगवान् श्रीरामायणकविः प्राचेतसः
9. वामदेवः—रामस्य कुलगुरु र्मैत्रावरुणिः
10. ऋष्यशृङ्गः—दशरथस्य जामाता, शान्तायाः भर्ता
11. सूत्रधारः—अन्तर्नाटिकायाः स्थापकः
12. पौरजानपदाः

स्त्रियः

1. [illegible] रामस्य दयिता, कथानायिका
2. कौसल्या—रामस्य जननी
3. [illegible]—दशरथस्य सुता
4. अरुन्धती—भगवती वासिष्ठस्य पत्नी
5. [illegible]—भगीरथगृहदेवता गङ्गादेवी
6. पृथ्वी—सीताया जननी विश्वम्भरा

प्रवेशकः—वाल्मीके राश्रमः

INTRODUCTION.

THE piece herewith presented to the public does not lay claim to much originality, as it is no new production ; its interest does not lie in conceiving any situation or expressing any thought that has not been formerly conceived and expressed by any other poet. But it is an attempt to supply what appears to be a want, to perfect what forces itself on the mind as an imperfection, which even because it is with regard to what in other respects is a master-piece, is all the more striking. We have, in other words long regarded that Act VII of Uttara. Ramacharita is not worked out in keeping with the rest of the play; that either the poet throughly broke down when he approched the end of the play, and found it too hard to describe the tears of union, or as is more probable, he did not live to complete the drama, and that perhaps he left only a slight sketch of the last Act which was given shape to by a lesser poet. The circumstanses that lead us to this conclusion may thus be detailed. (1) The situations conceived in the Act are not fully worked out. This is the case especially as we near the end.

Rama, as we now have the play, coolly receives Sita and he does not even make a formal bow to Valmiki, his benefactor and Guru. It is again hard to find out where Janaka enters and, though addressed to, he does not talk, nor, as may be expected, does Rama offer any apology for his cruel treatment of Janaka's unfortunate daughter. (2) This becomes the more noticeable when we look at the other plays of the poet, or any other standard plays, representing union after long separation such as in Sakuntala. (3) The language of the last Act also has ..e of the touches of Bhavabhuti; only the first and last stanzas of the Act could have been written by that great poet. For example Bhavabhuti, in our opinion, is at his best in his Anushtubhs; in his hands they are always exceedingly spirited and dignified. In Act VII however, this metre is quite mediocre and often inelegant. (4) Further there is a tradition among the pandits that Bhavabhuti died before completing this play, which was his last effort in the literary field.

We have thus no doubt that Act VII, as we now have it, only represents the rough

sketch made by the great poet. The result is that the Act, as it is, rather jars on the reader's feelings. It is to remove this defect that the present piece has been written.

A word however has to be said as to the manner in which the piece has been composed. The writer has had no desire to supply the whole himself. He has not scrupled to insert from the best writers the sentiments appropriate to each situation; he has to a great extent drawn on Valmiki; and since the *antar-nâṭika* is said to be by Valmiki, nothing can be more appropriate than to draw from him. A number of stanzas, in fact the best of them, have been transplaced from Act III. In this connection it may be noticed that when the play is enacted Act III is, to the ordinary spectator, quite inexplicable. How Sita could come to meet Rama on the Godavari few can understand; the situation is in fact the poet's creation. In enacting the play therefore Act III has to be omitted; but Act III poetically is the best; and therefore its best stanzas have been carried over to a more appropriate context, and inserted in Act VII as now compiled.

A few stanzas have also been taken or adapted from other authors; but mention need only be made of those from Sakuntala; and they have been inserted because the sentiments they contain cannot possibly be better expressed. The aim of the compiler has thus been more or less to give an imaginary outline of what the Act would have been, if the poet had fully worked it out. To rewrite it, without drawing on other masterpieces, and make it of a piece with the rest of the play we really need another as great as Bhavabhuti or perhaps one greater.

I am happy to note at the end that the piece, and in fact the whole play of which it is intended to form part, will be enacted on the occasion of His Majesty's coronation. This explains the Prologue which MR NARAYANA SASTRI has composed; it is, to say the least of it, very fine and appropriate and happily concludes with what may be called our national Anthem, couched in the divine strains of Bharatavarsha.

OTTAPALAM
MALABAR DT.
20th June 1902.

M. KRISHNAMACHARYA, B.A., L.T

PREFACE

The play now offered to the public was first brought out in 1902, as fifth of a series of works published under the auspices of the Vidvan Mano-Ranjani, a partly Dramatic and partly Literary Institution, which was established among other things for the purpose of encouraging literary compositions reflecting Indian thought and culture. Since then seven other works have been published under the same Series and they have been heartily welcomed and widely read by the public.

This piece which is a compilation in one act chiefly adapted from Acts III and VII of Bhavabhuti's famous drama—Uttararamacharita, was staged along with other acts of that masterpiece by the members of the Vidvan Mano-Ranjani on the occasion of the Coronation of Their Gracious Majesties King Edward VII and Queen Alexandra together with a prologue composed by me specially for the occasion. The subject of the play is, accordingly, the same as that of the Uttararamacharita and relates to that well-known and most pathetic story of the Exile of Sita and her long and sorrowful separation from Rama subsequent to the war with Ravana, as narrated in the Uttarakanda of Valmiki's Ramayana. Though the end of the original story is tragic, the meek and patient heroine *Sita* having been

carried away by the Mother Earth and the devoted and dutiful Rama disappearing in the waters of the Sarayu, the play as is roughly sketched by Bhavabhuti, and worked out in this compilation ends with the happy meeting of the hero, the heroine, and their heroic sons, in conformity with the rules of Sanskrit dramaturgy which prohibits tragic ends. Though the story thus ends happily, the play itself has been named from the *Antarnatika*, which is a splendid theatrical representation arranged by the Sage Valmiki with the help of his desciples and under the patronage and immediate presence of Rama himself and the plan is entirely Bhavabhuti's, though ascribed by him to Valmiki, who chooses this method of convincing Rama and his subjects of the spotless purity and whole-hearted devotion of Sita to Rama, and of bringing about a most touching re-union between them.

Compared to the effect thus produced by the Antarnatika, the contrivance of an Inner-drama in Shakespeare's Hamlet dwindless into nothing. I have no doubt that this play will be welcomed by all lovers of Indian stage, since it presents in a nutshell as it were what a good Sanskrit play is, and what noble purposes it serves. It is in fact, par excellence a Drama of criticism of real life, educating the public in their daily life and conduct with its highest moral and social lessons, by exhibiting efore our eyes some of the highest ideal characters

which any nation will be proud to follow for all place and time to come. So much so the copise of the first edition of this play became exhausted in the course of a very few years and the book had been long out of print, although there were frequent demands for the same ; and as a matter of fact the present edition had to be reprinted from a single copy of the book—that too, an imperfect one—fortunately preserved by the compiler.

The present edition, then, owes its existence to the Suguna Vilasa Sabha, one of the oldest Amateur Dramatic Institutions in Madras. At the request of my learned friend Mr. S. Satyamurti B.A B.L., High Court Vakil, Madras, I have now re-published this play in bold clear Nagari character with one or two additional songs, omitting, of course, the prologue which is no longer necessary. The play is proposed to be enacted by the members of the Suguna Vilasa Sabha on Friday the 15th October 1915 in connection with the Sabha's Dasara Celebrations, and I sincerely trust that it will serve as an impetus amongst the Sanskrit-knowing members of the Sabha to start and successfully work out a Sanskri Branch under its auspices.

SUNDARI SADANAM,
Madras,
15th Oct. 1915.

T. S. NARAYANASASTRI,
Compiler.

॥ अथ पञ्चकृत्याष्टक प्रारम्भः ॥

I. सर्वसाधारणमते

त्वं वै सर्वचराचरं सृजसि भोः,
त्वं पासि सर्वं जगत्,
त्वं वै संहरसि प्रपञ्च मखिलं,
त्वं तं तिरस्कुर्वसि ।
त्वं वै स्थावरजङ्गमं जग दिदं
प्रेम्णा ऽनुगृह्णा स्युमे,
त्वं सर्वस्य निदान मम्ब! जगतः,
त्वं पञ्चकृत्योज्वला ॥१॥

II गाणापत्यमते

त्वं ब्रह्मा ऽखिललोकसृष्टिनिपुणः,
त्वं विष्णु रस्या ऽविता,
त्वं रुद्रो ऽसि समस्तलोकहरणः,
त्वं वै महेशो ऽप्यसि ।
त्वं साक्षा द्धि सदाशिवो गणपतिः
विघ्नेभपञ्चाननः,

त्वं सर्वस्य निदान मम्ब! जगतः,
त्वं पञ्चकृत्योज्वला ॥२॥

III. ज्योतिर्वादिमते

त्वं सोमो ऽखिलसृष्टिकृत्यनिरतः
त्वं सूर्यरूपो ऽवासे,
त्वं ह्यग्निः सकलं जग द्धरसि भो,
त्वं भासि चेन्द्रात्मना ।
त्वं साक्षा द्धरुणो ऽसि सर्वजगतां
सत्याभया भासकः,
त्वं सर्वस्य निदान मम्ब ! जगतः,
त्वं पञ्चकृत्योज्वला ॥ ३ ॥

VI. वैष्णवमते

त्वं सृष्टिं कुरुषे ऽनिरुद्धवपुषा,
प्रद्युम्नरूपो ऽवसि,
त्वं सङ्कर्षणरूपतो हरसि भो
त्वं वासुदेवः परः ।

त्वं नारायणनामतो जग दिदं
पश्य स्युमेऽनुग्रहात्,
त्वं सर्वस्य निदान मम्ब! जगतः,
त्वं पञ्चकृत्योज्वला ॥४॥

V. शैवमते

सद्योजातमुखेन देवि! सृजासि ,
त्वं वामदेवोऽवासि,
त्वं चाऽघोरमुखेन संहरसि भोः,
तत्पूरुष स्त्वं शिवे ।
ईशानोऽसि हरन् पशोः पशुपतिः
पाशं कृपाचक्षुषा,
त्वं सर्वस्य निदान मम्ब ! जगतः,
त्वं पञ्चकृत्यो ज्वला ॥५॥

VI- शाक्तमते

इच्छाशक्ति रसि त्वमेव जननि !
त्वं वै क्रियाशक्तिभाक्,

चिच्छक्त्या सकलं प्रशासि भुवनं,
ह्यानन्दशक्त्येशिषे ।
सर्वानुग्रहकारिणी भगवती
त्वं चाऽसि शक्तिः परा,
त्वं सर्वस्य निदान मम्ब ! जगतः,
त्वं पञ्चकृत्योज्वला ॥ ६ ॥

VII. पौराणिकमते

त्वं वाणी सृजसि प्रपञ्च मखिलं,
लक्ष्मी स्त्व मंम्बा ऽवसि,
त्वं गौरी सकल प्रशासि भुवनं,
त्वं वै तुरीयेश्वरी ।
त्वं साक्षात् परदेवता विजयसे
श्रीराजराजेश्वरी,
त्वं सर्वस्य निदान मम्ब! जगतः,
त्वं पञ्चकृत्योज्वला ॥ ७ ॥

VIII. ओपनिषन्मते

त्वं गायत्र्यसि सर्ववेदजननी,
त्वं वै सरस्व त्यसि,
त्वं सावित्र्यसि दुष्टवर्गदमनी,
सन्ध्या त्वमेवाऽसि भोः ।
त्वं गायत्र्यभिपूजिता भगवती
श्रीब्रह्मविद्यात्मिका,
त्वं सर्वस्य निदान मम्ब! जगतः,
त्वं पञ्चकृत्योज्वला ॥८॥

फलश्रुतिः

पञ्चकृत्याष्टकमिदं
नानासमयसम्मतम् ।
यः पठेत् प्रयतो नित्यं
मुक्ति स्तस्य करे स्थिता ॥

। इति पञ्चकृत्याष्टकं सम्पूर्णम् ॥



श्रीमदुत्तररामचरितनाटके

श्रीसुगुणविलाससभायां प्रदर्शनार्थं

त. शं. नारायणशास्त्रिणा सङ्कलितः

वैदेहीविवासनाख्यगर्भाङ्कसमेतः

सप्तमोऽङ्कः

[नेपथ्ये कुशीलवा गायन्ति]

विजयतां परेशिता । विजयतां महेशिता॥
विजयतां सदाय मखिल-सुजनवर्गरक्षिता ।
विभव-भारित-चिदचि-दखिल-भुवनगणापिता ॥

अवतु नः परात्परः । अवतु नः परेश्वरः ॥
अवतु नः सदा हरीश- विधिमुखामरेश्वरः ।
अखिल-भुवन-भरण-हरण-करणविधिपरः ॥

सकलशक्तिसंयुतः । सकलवस्तुसङ्गतः ॥
सकलधर्ममार्ग भरण-निपुणतुर्यसंज्ञितः ।
सकल-निगम-जलधि-मथन-भवरसविदितः ॥

करुणया पुनात्विमाम् । करुणयेश्वरः शुभाम् ॥
करुणया पुनातु सुगुण-नटविलासिनीं सभाम् ।
कलित-सुजन-हृदय-नळिन-तरणिरुचिनिभाम् ॥

[ततः प्रविशति लक्ष्मणः]

लक्ष्मणः—भो ! भो !! अद्य खलु भगवता वाल्मीकिना सब्रह्मक्षत्रपौरजानपदाः प्रजाः सहास्माभि राहूय, कृत्स्न एव सदेवासुरतिर्यगुरगनायकनिकायो जङ्गमः स्थावरश्च भूतग्रामः स्वप्रभावेण सन्निधापितः । आदिष्टश्चाह मार्येण, "वत्स !

लक्ष्मण, भगवता वाल्मीकिना स्वकृति मन्ते-वासिभिः प्रयुज्यमानां द्रष्टु मुपनिमन्त्रिताः स्मः। त द्भागीरथीतीरमनोज्ञस्थान मुपगम्य क्रियतां समाजंसन्निवेश" इति। कृतं च मर्त्यामर्त्यस्य भूतग्रामस्य समुचितस्थानेषु समुपवेशनं मया। अयंतु

राज्याश्रमनिवासेऽपि प्राप्तकष्टमुनिव्रतः।
वाल्मीकिगौरवा दार्य इत एवाऽभिवर्तते॥

[ततः प्राविशति रामः]

रामः—वत्स! लक्ष्मण, अपि स्थिता रङ्गप्रेक्षकाः?

लक्ष्मणः—अथ किम्।

रामः—अप्यागतौ वत्सौ कुशलवौ?

लक्ष्मणः—वत्सचन्द्रकेतुना सह पूर्वमेवागत्य तिष्ठतः।

चन्द्रकेतुः—[राम मुपगम्य] तात ! अभिवादये, चन्द्रकेतु रह मस्मि । [इति प्रणमति]

रामः—[सहर्षं]

दिनकरकुलचन्द्र ! चन्द्रकेतो !
सरभस मेहि दृढं परिष्वजस्व ।
तुहिनशकलशीतलै स्तवाङ्गैः
शम मुपयातु ममाऽपि चित्तदाहः ॥

[उत्थाप्य, सस्नेहं परिष्वज्य] अपि नाम कुशलं तव दिव्यास्त्रधरदेहस्य ?

चन्द्रकेतुः—कुशल मत्यद्भुतक्रिययोः प्रियदर्शनयोः कुशलवयो र्लाभाभ्युदयेन । तं द्विज्ञापयामि मामिव, विशेषेणवा मत्तः, स्निग्धेन चक्षुषा पश्यत्विमौ महावीरप्रकाण्डौ तातः ।

कुशः—[सविनय मुपसृत्य] आर्य ! अभिवादये, कुशोऽह मस्मि

रामः—[दृष्ट्वा, सानन्दं] एह्येहि कुमार! स्वस्ति! आयुष्मान् भव!

वक्षः प्रसारय कवाटपुटप्रमाणं,
आलिङ्ग मां सुविपुलेन भुजद्वयेन।
उन्नामयानन मिदं शरदिन्दुकल्पं,
प्रह्लादय व्यसनदग्ध मिदं शरीरम्॥

कुशः—अनुगृहीतोऽस्मि।

लवः—[सविनय मुपेत्य] आर्य! एष वो लवस्य शिरसा प्रणामपर्यायः।

रामः—एह्येह्यायुष्मन्!
अमृताध्मातजीमूतस्निग्धसंहननस्य ते।
परिष्वङ्गाय वात्सल्या दय मुत्कण्ठते जनः॥

[परिष्वजन् आत्मगतं]

अहो प्रश्रययोगेऽपि गतिस्थित्यासनादयः।
साम्राज्यशंसिनो भावाः कुशस्य च लवस्य च॥

भूयिष्ठां च रघुकुलकुमारच्छाया मनयोः पश्यामि!

कठोरपारावतकण्ठमेचकं
वपु र्वृषस्कन्धसुबन्धुरांसकम् ।
प्रसन्नसिंहस्तिमितं च वीक्षितं
ध्वनि श्च माङ्गल्यमृदङ्गमांसलः ॥

[निपुणं निरूप्य] अये न केवल मस्मदङ्गसंवादि न्याकृतिः!

अपि जनकसुताया स्तच्च तच्चानुरूपं
स्फुट मिह शिशुयुग्मे नैपुणोन्नेय मस्ति।
ननु पुन रिव त न्मे गोचरीभूत मक्ष्णोः
अभिनवशतपत्रश्रीमदास्यं प्रियायाः ॥

[विचिन्त्य]तदेतत् प्राचेतसाध्युषित मरण्यं, यत्र किल देवी परित्यक्ता । इयं च अनयो राकृति र्वयोनुभाव श्च। अयं च संप्लवमान मात्मानं सुखदुःखातिशयो हृदयस्य मे विस्रंभयते । यमा

विति च भूयिष्ठमात्मसंवादः । भूयिष्ठं च मया द्विधा प्रतिपन्नो देव्या गर्भिणीभाव आसीत् ।

[सास्रं]

पुरा रूढे स्नेहे परिचयविकासा दुपचिते
रहो विस्रब्धाया अपि सहजलज्जाजडदृशः ।
मयैवादौ ज्ञातः करतलपरामर्शकलया
द्विधा गर्भग्रन्थि स्तदनु दिवसैः कैरपि तया॥

[रुदित्वा] तत् किमेतौ पृच्छामि केनाप्युपायेन ?

लवः—तात ! किमेतत् ?

बाष्पवर्षेण नीतं वो जगन्मङ्गळ माननम् ।
अवश्यायावसिक्तस्य पुण्डरीकस्य चारुताम्॥

कुशः—अयि वत्स !

विना सीतादेव्या किमिव हि न दुःखं रघुपतेः ?
प्रियानाशे कृत्स्नं किल जग दरण्यं हि भवति ।
स च स्नेह स्तावान्, अय मपि वियोगो निरवधिः
किमेवं त्वं पृच्छ स्यनधिगतरामायण इव॥

रामः—[स्वगतं] अये! तटस्थित आलापः! कृतं प्रश्नेन। मुग्धहृदय! कोऽय माकस्मिक स्ते स्नेहपरिप्लवो विकारः। एवं च निर्भिन्नहृदयावेगः शिशुजनेनाप्यनुकम्पितोऽस्मि। भवतु ताव दन्तरायामि। [प्रकाशं] वत्स! लक्ष्मण, इमौ पुनः कुमारौ चन्द्रकेतुसदृशीं स्थानप्रतिपत्तिं लम्भयितव्यौ।

लक्ष्मणः—प्रभुस्नेहप्रत्ययात् तथैव करिष्ये। इदं त्वास्तीर्णं राजासन मुपविशत्वार्यः।

[रामः उपविशति, सर्वे च सुमन्त्रप्रभृतयः कुशलवचन्द्रकेतवश्च यथामर्याद मुपविशन्ति]

लक्ष्मणः—प्रस्तूयतां भोः।

[प्रविश्य]

सूत्रधारः—[सप्रणाम मञ्जलिं बध्वा नान्दीं प्रयोजयन्]

कल्याणानां निदानं, कलिमलमथनं,
जीवनं सज्जनानां,

पाथेयं य न्मुमुक्षोः सपदि परपद-
प्राप्तये प्रस्थितस्य ।
विश्रामस्थान मेकं कविवरवचसां,
पावनं पावनानां,
बीजं धर्मद्रुमाणां, प्रभवतु , भवतां
भूतये, रामनाम ॥

[पुष्पाञ्जलिं विकीर्य] भो भो ! भगवान् भूतार्थ-वादी प्राचेतसः सजङ्गमस्थावरं जग दाज्ञापयति, "यदिद मस्माभि रार्षेण चक्षुषा समुद्वीक्ष्य पाव-नकरुणाद्भुतरसं वैदेहीविवासनाख्यं किञ्चि दुप-निबद्धं, तत्र कार्यगौरवा दवधातव्य" मिति ।

रामः—एतदुक्तं भवति—साक्षात्कृतधर्माणो-महर्षयः, तेषा ममृतसाराणि भगवतां परोरजां सि प्रज्ञानानि न क्वचिद् व्याहन्यन्त इत्यनाभि-शङ्कनीयानीति ।

सूत्रधारः—

विश्वम्भरात्मजा देवी राज्ञा त्यक्ता महावने।
प्राप्तप्रसव मात्मानं गङ्गादेव्यां विमोक्ष्यति ॥

[इति निष्क्रान्तः]

प्रथमः प्रघट्टकः

[नेपथ्ये]

पापापहारि दुरितारि तरङ्गधारि,
शैलप्रचारि गिरिराजगुहाविदारि ।
झङ्कारकारि हरिपादसरोजहारि,
पात्वम्ब ! ते जनकजां शुभकारि वारि ॥

लक्ष्मणः—हा कष्टं ! उन्मत्तीभूतमिव मे हृदयम् । अहो दुर्जनवचनात् किं किमनुष्ठित मार्येण !

अयि कठोर, यशः किल ते प्रियं!
कि मयशो ननु घोर मतः परम् ?।
कि मभव द्विपिने हरिणीदृशः
कथय नाथ कथं बत मन्यसे ॥

रामः—वत्स! किमत्र मन्तव्यम् ?

त्रस्तैकहायनकुरङ्गविलोलदृष्टे
स्तस्याः परिस्फुरितगर्भभरालसायाः ।
ज्योत्स्नामयीव मृदुबालमृणाळकल्पा
कव्याद्भि रङ्गलतिका नियतं विलुप्ता ॥

[ततः प्रविशति गर्भभरालसा सीता]

सीता—[सशोकावेगम्]

आर्यतनय! हृदि तव किमिदं स्थितं
अहह! कदापि न जाने ।
क्वचि दिह जगति न खलु भवदप्रियं
अह मकरवमिति जाने ॥

एकश इह मम तपनकुलोज्वल !
निकटीभव गुणसिन्धो ।
दर्शय निजमुख मोषधिपतिरुचिं
आर्तिसमाकुलबन्धो ॥
वीक्ष्य तवास्यविधुं ललितं म्रिय
एषा चिर मतिकष्टा ।
दाशरथे र्दयिता रुदती खलु
नम्रमुखी शुभदिष्टा ॥

रामः—

अश्मसार मिदं नून मथवा प्यजरामरम् ।
हृदयं मम येनेदं न दुःखेनाऽवशीर्यते ॥

लक्ष्मणः—[स्वगतं] कष्टं बतान्यदेव किमपि !

लवः—अये इय मत्रभवती जनकराजपुत्री !
इदं तत् स्त्रीमयं ते जो जातं क्षेत्रोदरा द्बलात् ।
जनकस्य नृपेन्द्रस्य तपसः सन्निदर्शनम् ॥

कुशः— सम्यगुपलक्षित मायुष्मता ।

परिपाण्डुदुर्बलकपोलसुन्दरं,
दधती विलोलकबरीक माननं ।
करुणस्य मूर्ति रधवा शरीरिणी
विरहव्यधैव वन मेति जानकी ।

सीता—[सभयं परितो विलोक्य] हा आर्यपुत्र ! हा कुमार लक्ष्मण ! एकाकिनीं मन्दभागिनीं अशरणा मरण्ये आसन्नप्रसववेदनां हताशाः श्वापदा मा मभिलषन्ति

रामः—हा देवि! क्षण मवेक्षस्व [इति सावेग मुत्तिष्ठति]

लक्ष्मणः—आर्य, नाटक मिदम् ।

सीता—हा आर्यपुत्र ! हा अरविन्दाक्ष ! हा अप्रतिमप्रभाव ! हा अखिललोकशरण्य ! मुषि ताऽस्मि! परिभूताऽस्मि दैवेन !!

हा राम सत्यव्रत दीर्घबाहो,
हा पूर्णचन्द्रप्रतिमानवक्त्र ।
हा जीवलोकस्य हितैकनिष्ठ
हाहा त्वयाऽहं विजने विसृष्टा ॥
सत्यं बतेदं प्रवदन्ति लोके
नाऽकालमृत्यु र्भवतीति सन्तः ।
यत्राह मेवं परिभूयमाना
जीवामि किञ्चित् क्षणम प्यपुण्या ॥
सुखा द्विहीनं बहुदुःखपूर्णं
इदन्तु नूनं हृदयं स्थिरं मे ।
विशीर्यते य न्न सहस्रधाऽद्य
वज्राहतं शृङ्ग मिवाऽचलस्य ॥
हा राम! हा लक्ष्मण ! हा सुमित्रे !
हा राममातः सह मे जनन्या ।
एषा विपद्या म्यह मल्पभाग्या
महार्णवे नौरिव मूढवाता ॥

सेदानीं मन्दभागिनी भागीरथ्या मात्मानं निक्षेप्स्यामि । [इति गङ्गायां निपतति]

रामः—हा देवि दण्डकारण्यवासप्रियसखि ! एष ते रामा दैवदुर्विपाकः । हा कष्टम् !

व्यर्थं यत्र कपीन्द्रसख्यमपि मे, वीर्यं हरीणां वृथा,
प्रज्ञा जाम्बवतोऽपि यत्र न गतिः,पुत्रस्य वायोरपि।
मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः,
सौमित्रे रपि पत्रिणा मविषये, तत्र प्रिये क्वासि मे॥

लक्ष्मणः—आर्य, अतिक्रान्ते धैर्य मवलम्ब्यताम् ।

रामः—वत्स ! किमुच्यते धैर्य मिति ।

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः ।
प्रणष्टमिव नामापि न च रामो न जीवति ॥

लक्ष्मणः—आर्य, समाश्वस्य दृश्यतां प्रबन्धार्थः ।

रामः—एष सज्जोऽस्मि वज्रमयः। मया खलु

यथा तिरश्चीन मलातशल्यं
प्रत्युप्त मन्तः सविषश्च दंशः ।
तथैव तीव्रो हृदि शोकशङ्कुः
मर्माणि कृन्तन्नपि किं न सोढः ॥

द्वितीयः प्रघट्टकः

[ततः प्रविशति उत्सङ्गितैकैकदारकाभ्यां
गङ्गापृथिवीभ्यां मपर्लाम्बता सीता]

रामः—[विलोक्य] कष्टं भोः कष्टम्!

दलति हृदयं गाढोद्वेगं, द्विधा तु न भिद्यते,
वहति विकलः कायो मोहं, न मुञ्चति चेतनाम् ।
ज्वलयति तनू मन्तर्दाहः, करोति न भस्मसात्,
प्रहरति विधि र्मर्मच्छेदी, न कृन्तति जीवितम्॥

वत्स लक्ष्मण, असंविज्ञात मनिबन्धन मन्धतमस
मिव प्रविशामि, धारय माम् ।

भागीरथीपृथिव्यौ—

समाश्वसिहि कल्याणि! दिष्ट्या वैदेहि वर्धसे।
अन्तर्जलं प्रसूताऽसि रघुवंशधरौ सुतौ ॥

सीता—[समाश्वस्य]दिष्ट्या ! दारकौ प्रसूताऽस्मि। हा आर्यपुत्र ! । [इति मूर्च्छति]

रामः—

हा हा देवि ! स्फुटति हृदयं, स्रंसते देहबन्धः,
शून्यं मन्ये जगद्, अविरतज्वाल मन्त र्ज्वलामि ।
सीद न्नन्धे तमसि विधुरो मज्जती वान्तरात्मा,
विष्वङ्मोहः स्थगयति,कथं मन्दभाग्यःकरोमि ॥

[इति मूर्च्छति]

कुशः— [निर्वर्ण्य]

अनिर्भिन्नगभीरत्वात्, अन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥

लक्ष्मणः—[पादयोर्निपत्य] आर्य, दिष्ट्या वर्धामहे । कल्याणप्ररोहो रघुवंशः।[विलोक्य] हा हा! कथं क्षुभितबाष्पोत्पीडनिर्भरः प्रमुग्ध एवार्यः ।

[इति वीजयति]

देव्यौ—वत्से, समाश्वसिहि समाश्वसिहि ।

सीता—भगवत्यौ, के युवाम्?

पृथ्वी—इयं ते श्वशुरकुलदेवता भागीरथी।

सीता—भगवति! नम स्ते ।

भागीरथी—चारित्रोचितां कल्याणसंपद मधिगच्छ ।

लक्ष्मणः—अनुगृहीताः स्मः ।

भागीरथी—इयं ते जननी भगवती विश्वम्भरा ।

सीता—हा अम्ब! ईदृश्यहं त्वया दृष्टा ।

[इति रोदिति]

पृथ्वी----एहि पुत्रि ! [इत्युभे आलिङ्गय मूर्च्छतः]

लक्ष्मणः—[सहर्षम्] कथ मार्या गङ्गापृथिवी-भ्या मभ्युपपन्ना ।

रामः—दिष्टया खल्वेतत् करुणोत्तरं वर्तते ।
ईदृशानां विपाकोऽपि जायते परमाद्भुतः ।
यत्रोपकरणीभाव माया त्येवंविधो जनः ॥

भागीरथी—विश्वम्भरापि नाम व्यथत इति जित मपत्यस्नेहेन । यद्वा सर्वसाधरणो ह्येष मोहग्रन्थि रान्तर श्चेतनावता मनुपप्लवः संसार-तन्तुः । सखि भूतधात्रि, वत्से सीते, समाश्व-सिहि समाश्वसिहि ।

पृथ्वी—देवि ! सीतां प्रसूय कथ माश्वसिमि ?

एक श्चिरं राक्षसमध्यवासः ,
त्यागो द्वितीयश्च सुदुःसहोऽस्याः ।

भागीरथी—

को नाम पाकाभिमुखस्य जन्तोः
द्वाराणि दैवस्य पिधातु मीष्टे ॥

पृथ्वी—भगवति भागीरथि, सदृशमुक्तम्! युक्त मेतद्वा रामभद्रस्य?

न प्रमाणीकृतः पाणि र्बाल्ये बालेन पीडितः।
नाहं न जनको नाग्नि र्नानुवर्ति र्नसन्ततिः॥

रामः—एव मतिनिष्कम्पस्तम्भितान्तःकरण स्यापि मम संस्तुततत्तत्प्रियवस्तुश्रवणा दुद्याय मावेगः। तथाहि,

लोलोल्लोलक्षुभितकरणोज्जृम्भणस्तम्भनार्थं
यो यो यत्नः कथमपि मया धीयते, तं त मन्तः।
भित्वा भित्वा प्रसरति बलात् कोऽपि चेतोविकारः
तोयस्येवाऽप्रतिहतरयः सैकतं सेतु मोघः॥

सीता—आर्यपुत्रं स्मारितास्मि ।

पृथ्वी—आः ! क स्तवार्यपुत्रः ?

सीता—[सलज्जास्मितं] हा अम्ब ! आर्यपुत्रस्य हृदयं ज्ञात्वापि किमेवं भण्यते ?

पति र्हि देवता नार्याः, पति र्बन्धुः, पति र्गुरुः।
प्राणैरपि प्रियं तस्माद् भर्तुः कार्यं विशेषतः॥

रामः—अम्ब पृथ्वि! ईदृशोऽस्मि ।

पृथ्वी—अहो ! नृशंसकारिता रामस्य !

देवकल्पा मिमां साध्वीं भर्तृशुश्रूषणे रताम् ।
अवेक्षमाणः को धर्मं त्यजेत् पत्नी मकारणात्॥

सीता—शान्तं पापम्! शान्तं पापम्!! कथं नृशंस आर्यपुत्रः ? विधिदुर्नियोगः खल्वयम् ।

अहं हि ते मात रवैमि नित्यं
स्नेहं च भक्तिं च महत्व मेव ।

मम त्वभिप्राय मसन्निरीक्ष्य
भर्त्रे भृशं कुप्यसि शुद्धधाम्ने ॥

अपि च

गुरुश्च राजा दयितश्च मान्यः
क्रोधात् प्रहर्षा द्यदिवाऽपि कामात् ।
यद् व्यादिशेत् कार्य मवेक्ष्य धर्मं,
का त न्न कुर्या दनृशंसवृत्तिः ॥

भागी.—भगवति वसुन्धरे ! शरीरमसि संसारस्य, तत् कि मसंविदानेव जामात्रे कुप्यसि ?

घोरं लोके वितत मयशो, या च वह्नौ विशुद्धि र्लङ्काद्वीपे, कथ मिव जन स्ता मिह श्रद्धधातु। इक्ष्वाकूणां कुलधन मिदं यत् समाराधनीयः कृत्स्नो लोकः, त दतिगहनं, किं स वत्सः करोतु ॥

लक्ष्मणः—अव्याहतान्तःप्रकाशा हि देवताः

सत्त्वेषु, विशेषतो गङ्गा । त दय मञ्जालि स्ते ।

रामः—अम्ब ! अनुवृत्त स्त्वया भगीरथकुले प्रसादः ।

पृथ्वी—देवि ! नित्य प्रसन्नास्मि वः । किं तु आपातदुःसहस्नेहावेगेनैवं ब्रवीमि । न पुन र्न जानामि सीतास्नेहं रामभद्रस्य ।

दह्यमानेन मनसा दैवा द्वत्सां विहाय सः ।
लोकोत्तरेण सत्वेनप्रजा पुण्यैश्च जीवति ॥

रामः—सकरुणा हि गुरवो गर्भरूपेषु ।

सीता—अहह ! दारुणो दैवदुर्विपाकः !

धिङ् मा मनार्या मसतीं, याऽहं तेन विनाकृता ।
मुहूर्त मपि रक्षामि जीवितं पापजीविता ॥

अथवा,

मामिकेयं तनु र्नूनं सृष्टा दुःखाय मातरौ ।
धात्रा, यस्या स्तथा मेऽद्य दुःखमूर्तिः प्रदृश्यते॥

किन्नु पापं कृतं पूर्वं? को वा दारै र्वियोजितः?।
याऽहं शुद्धसमाचारा त्यक्ता नृपतिना सती॥

रामः—हे भवन्तः पौरजानपदाः !

न किल भवतां स्थानं देव्या गृहेऽभिमतं ततः
तृण मिव वने शून्ये त्यक्ता न चा प्यनुशोचिता।
चिरपरिचिता स्ते ते भावाः परिभ्रमयन्ति मां
इद मशरणै रद्या ऽ स्माभिः, प्रसीदत, रुद्यते॥

सीता—त न्नयतु मा मात्मनोऽङ्केषु विलय मम्बा ।

रामः —कि मन्य द्भवीतु ।

भार्गी.—आः शान्तम् ! किं ब्रवीषि!! अविलीना संवत्सरसहस्रं भूयाः ।

पृथ्वी—वत्से! अपि रक्षणीयौ ते पुत्रकौ ?

सीता—अनाथाऽस्मि ।

रामः—हा अनाथेति हतोऽस्मि! हा चारित्रदेवते,

त्वया जगन्ति पुण्यानि, त्व य्यपुण्या जनोक्तयः।
नाथवन्त स्त्वया लोकाः, त्व मनाथा विपत्स्यसे॥

भागी.—कथं त्वं सनाथा प्यनाथा ?

सीता—आर्यपुत्रेण परित्यक्तायाः कीदृशं मम अभाग्यायाः सनाथत्वम् ?

का च मे जीविते श्रद्धा, सुखे वा तं प्रियं विना ।
भर्तारं सागरान्तायाः वसुधायाः प्रियंवदम् ॥

रामः—भोः! क्वविशामीदानीं मन्दभागधेयः!

प्राणाः प्रयान्ति, परित स्तमसा वृतोऽस्मि,
मर्मच्छिदो मम रुजः प्रसर न्त्यपूर्वाः ।

अक्ष्णो र्मुखेन्दु मुपधेहि, गिरं च देहि,
हा देवि मय्यकरुणा सहसैव मा भूः ॥

देव्यौ—

जगन्मङ्गल मात्मानं कथं त्व मवमन्यसे ।
आवयो रपि यत्सङ्गात् पवित्रत्वं प्रकृष्यते॥

लक्ष्मणः—आर्य ! श्रुतम् ?

रामः—शृणोतु लोकः ।

[नेपथ्ये कलकलः]

लक्ष्मणः—अद्भुततरं किमपि !

सीता—किमित्यन्तरिक्षं प्रज्वलति ?

देव्यौ—ज्ञातम् !

कृशाश्वः कौशिको रामः, इति येषां गुरुक्रमः ।
आविर्भवन्ति तान्येव शस्त्राणि सह जृंभकैः॥

[नेपथ्ये]

देवि सीते नम स्ते स्तु ! गति र्नः पुत्रकौ हि ते।
आलेख्यदर्शने देवो य दाह रघुनन्दनः ॥

सीता—दिष्ट्या ! अस्त्रदेवताः परिस्फुरन्ति।

लक्ष्मणः—उक्त मासी दार्येण सर्वथेदानीं त्वत्प्रसूति मुपस्थास्यन्तीति ।

देव्यौ—

नमो वः परमास्त्रेभ्यो धन्याःस्मो वः परिग्रहात्।
अनुध्यातै रुपेतव्यं वत्सयो र्भद्र मस्तु वः ॥

रामः—

क्षुभिताः कामपि दशां कुर्वन्ति मम सांप्रतम् ।
विस्मयानन्दसन्दर्भजर्जराः करुणोर्मयः ॥

देव्यौ—मोदस्व वत्से ! मोदस्व। रामभद्रतुल्या विदानीं ते पुत्रकौ संवृत्तौ ।

सीता—भगवत्यौ ! क एतयोः क्षत्रियोचितं कर्म करिष्यति ?

रामः—

एषा वसिष्ठगुप्तानां रघूणां वंशवर्धनी ।
कष्टं! सीतापि सुतयोः संस्कर्तारं न विन्दति॥

देव्यौ—पुत्रि ! कि न्तवाऽनया चिन्तया । एतौ हि वत्सौ स्तन्यत्यागात्परेण भगवतो बाल्मीके र्पयिष्यावः । स एतयोः क्षत्रकृत्यं करिष्यति ।

यथा वसिष्ठांगिरसा वृषी, प्राचेतस स्तथा ।
रघूणां जनकानां च वंशयो रुभयो र्गुरुः ॥

रामः—सुविचिन्तितं भगवतीभ्याम् ।

लक्ष्मणः—आर्य ! सत्यं विज्ञापयामि तै स्तै-रुपायै र्वत्सौ कुशलवा वुत्प्रेक्षे ।

एतौ हि जन्मसिद्धास्त्रौ, जातौ प्राचेतसा न्मुनेः।
वीरौ, संप्राप्तसंस्कारौ, वयसा द्वादशाब्दिकौ ॥

रामः—वत्स ! इत्येवाऽह मपि परिप्लवमान-हृदयः संप्रमुग्धोऽस्मि।

पृथ्वी—एहि वत्से पवित्रीकुरु रसातलम्।

रामः—हा ! प्रिये! लोकान्तरं पर्यवसिताऽसि। हा देवि देवयजनसम्भवे!

अन्तार्हितं किमपि तत्तु पतिव्रतात्वं,
धर्मः स कोपिच हतः कुलकामिनीनाम्।
सौशील्य मस्तमितमेव तद प्यचिन्त्यं,
लोकान् यदि प्रतिगतासि पतिव्रताहान् ॥

सीता—नयतु मा मात्मनोऽङ्केषु विलय मम्बा। न शक्ताऽस्मि ईदृशं जीवलोकपरिवर्त मनुभवितुम्।

रामः—[सबाष्पम्] हा मन्दभाग्यस्य मे किं नाम न संभवति ।

हा हा किं नु करोमि, कं नु शरणं
याामि, व्रजामि क्व वा,
कं पश्यामि, क मालपामि, कतमं
पृच्छामि, यच्छामि किम् ।
गत्वा कुत्र, क मत्र वा प्रतिदिनं
नत्वा, विदित्वाऽथ किं,
कृत्वा किं च, पुन र्मम प्रियतमां
द्रक्ष्यामि चन्द्राननाम् ॥

गङ्गा—एवं नाम ।

सीता—हा आर्यपुत्र! हा कुमार लक्ष्मण! हा तात जनक! हा मातः कौसल्ये! हा अम्ब अरुन्धति! एष मे मन्दभाग्यायाः पापायाः सीतायाश्चरमः प्रणामाञ्जलिः । [अञ्जलिं बध्वा]

हा देव! हा दयित! हा जगदेकबन्धो!
हा नाथ! हा चपल! हा करुणैकसिन्धो।
हा राम! हा रमण! हा हृदयाभिराम!
हा हा! कदानु भवितासि पदं दृशो मे॥

[इति विलपन्ती देवीभ्यां रसातलं प्रविशति]

रामः—[विलोक्य सोन्मादं]

सौमित्रे ननु सेव्यतां तरुतलं, चण्डांशुरुज्जृंभते

लक्ष्मणः—[सकरुणं]

चण्डांशोर्निशिकाकथा रघुपतेचन्द्रोऽयमुन्मीलति।

रामः—

वत्सै त द्विदितं कथं नु भवता?

लक्ष्मणः— धत्ते कुरङ्गं यतः,

रामः—

काऽसि?प्रेयसि!हा कुरङ्गनयने! चन्द्राननेजानकि॥

[इति मूर्च्छति]

लक्ष्मणः—आर्य, समाश्वासिहि समाश्वासिहि।

रामः—[समाश्वस्य सस्मृतिविभ्रमम्]

भोः क स्त्वं?

लक्ष्मणः— लक्ष्मणोहं स भवदनुचरः,

रामः— कोऽहं?

लक्ष्मणः— आर्यः स रामः

रामः— को रामो नाम?

लक्ष्मणः— भङ्क्ता पुरहरधनुषः,

रामः— कुत्र भग्नं धनु स्तत्।

लक्ष्मणः— गेहे वैदेहराज्ञः,

रामः— स किल नरपतिः कीदृक्?

लक्ष्मणः— आर्यापितासौ,

रामः— का वार्या नाम?

लक्ष्मणः— सीता,

रामः—कथय कथय रे हन्त सीता क्व याता॥

[इति पुनर्मूर्च्छति

लक्ष्मणः—आर्य, प्रसीद प्रसीद । स्वेनैव लोकोत्तरेण धैर्येण संस्तम्भयातिभूमिंगतविप्र लम्भ मात्मानम् ।

रामः—[पुनः समाश्वस्य] हा कथं विलय एव वैदेह्याः संपन्नः । [सोन्मादमुत्थाय परिभ्रमन्] हा प्रिये जानकि ! क्वासि ? मन्दभाग्य ममुं जनं विहाय क्व गतासि? हा देवि देहि मे दर्शनम् ! ब्रूहि मे प्रति वचनम्। हन्त शून्यः संसारः! शून्या दिशः! शून्य श्च निंखिलं महीमण्डलम् । अहो अस्तमुपगतं चे दानीं रामस्य जीवितप्रयोजनम् । [सर्वतो ऽवलोक्य] हा कथं लोकान्तरं पर्यवसितैव जानकी ! भो भो दुरात्मन् रामहतक ! कथ मद्यापि न म्रियसे ? किमात्मघातिनो लोका दात्मानं परि-त्रातु मिच्छसि ? धिङ् मूर्ख !

वर मद्यैव निर्मज्ज न्नन्धे तमसि दारुणे ।
सीताननेन्दुरहिता न पुन र्वीक्षिता दिशः॥

अहो धर्मदारपरित्यागिन्! न खलु प्राणाप्रियातः प्रिया स्ते प्राणाः!

अन्धंतमःक्रकचभैरवपूयवीची-
चण्डासिपत्रवनरौरवशाल्मलीषु ।
नैतेषु सन्ति नरकेष्वपि यातना स्ताः
दुःखेन याः प्रियसतीत्यजनेन तुल्याः॥

त दविलम्बितं प्राणाः प्रयात प्रयात!

अतः परं यद् व्यसनं नून मभ्युदयो हि सः।
पापस्याऽभ्युदयद्वार मिदानीं मरणं हि मे ॥

[इति विलपन् मूर्च्छितो भूमौ निपतति]

सर्वे—[ससंभ्रम मुत्थाय] भगवन् वाल्मीके परित्रायस्व परित्रायस्व! कि मेष ते काव्यार्थः?

लक्ष्मणः—हा भ्रातृवत्सल ! परहितैकनिष्ठ !!

[इति मूर्च्छति]

सुमन्त्रः—अहो संविधानकम्!

एको रसः करुण एव निमित्तभेदा
द्भिन्नः पृथक् पृथ गिवाश्रयते विवर्तान्।
आवर्तबुद्बुदतरङ्गमयान् विकारान्
अम्भो यथा सलिल मेव तु तत्समग्रम्॥

[नेपथ्ये]

अपनीयता मातोद्यकम्। भो भोः सजङ्गमस्थावराः प्राणभृतो मर्त्यामर्त्याः! पश्यत महर्षिणा भगवता वाल्मीकिना ऽभ्यनुज्ञातं पवित्र माश्चर्यम्।

लक्ष्मणः—[समाश्वस्य विलोक्य]

मन्थादिव क्षुभ्यति गाङ्ग मम्भः,
प्राप्तं च देवर्षिभि रन्तरिक्षम्।

आश्चर्य मार्या सह देवताभ्यां
गङ्गामहीभ्यां सलिला दुदेति ॥

[नेपथ्ये]

अरुन्धति जगद्वन्द्ये गङ्गापृथ्व्यौ जुषस्व नौ।
अर्पितेयं तवाभ्याशे सीता पुण्यव्रता वधूः॥

लक्ष्मणः—आश्चर्य माश्चर्यम् । आर्य, पश्य पश्य ![विलोक्य]कष्ट मद्यापि नोच्छ्वसि त्यार्यः।

[इति वीजयति]

[ततः प्रविशति वासिष्ठ ऋष्यशृङ्गप्रभृतिभिःशान्तया गङ्गापृथिवीभ्यां कौसल्ययाचाऽनुगम्यमाना अरुन्धती सीता च]

वसिष्ठः—अयि! वत्से, कथं न पश्यसि राम-स्यावस्थाम् ?

कुवलयदलस्निग्धै रङ्गै र्ददौ नयनोत्सवं
सतत मपि ते स्वेच्छा दृश्यो नवो नव एव यः।

विकलकरणः पाण्डुच्छायः शुचा परिदुर्बलः,
कथमपि स इत्युन्नेतव्यः, तथापि दृशां प्रियः॥

सीता—हा दैव! एष मया विना, अह मेतेन विनेति, केन वा संभावितमासीत्। तन्मुहूर्तकमपि जन्मान्तरत इव लब्धदर्शनं बाष्पसलिलान्तरेषु प्रेक्षे ताव दुत्सल मार्यपुत्रम्। [विलोक्य सास्रम्] हा धिक्! हा धिक्!! कथं मामेव मन्दभागिनीं व्याहृत्य, आमीलन्नेत्रनीलोत्पलो मूर्च्छित एव आर्यपुत्रः। हा कथं धरणीपृष्ठे निरुत्साहानिःसहं विपर्यस्तः। भगवत्यरुन्धति, परित्रायस्व परित्रायस्व! जीवय आर्यपुत्रम्। [इति पादयोः पतति]

अरुन्धती—

त्वमेव ननु कल्याणि! सञ्जीवय जगत्पतिम्।
प्रियस्पर्शो हि पाणि स्ते, तत्रैव नियतो भवः॥

सीता—भगवत्यरुन्धति, तथा निष्कारणप-
रित्यागिनोऽपि एतस्य एवंविधेन दर्शनेन कीदृश
इव मे हृदयानुबन्ध इति न जानामि ।

अरुन्धती—जानामि वत्से जानामि !

तटस्थं नैराश्यात्, अपिच कलुषं विप्रियवशात्,
वियोगे दीर्घेऽस्मिन् झटिति घटनोत्तम्भित मिव।
प्रसन्नं सौजन्यात्, दयितकरुणै र्गाढकरुणं,
द्रवीभूतं प्रेम्णा तव हृदय मस्मिन् क्षण इव ॥

लक्ष्मणः—हा कष्टं ! अतिचिरनिरुद्धनिश्वा-
सनिष्पन्दं हृदय मार्यस्य !

कौसल्या—[ससंभ्रमम्]

त्वरस्व वत्से वैदेहि, मुञ्च शालीनशीलताम्।
एहि जीवय मे वत्सं प्रियस्पर्शेन पाणिना॥

शान्ता—अयि वत्से ! एहि, संभावय
आत्मनो जीवितेश्वरम् ।

सीता—यथाज्ञापयति गुरुजनः। [इति ससंभ्रम मुपसृत्य हृदि ललाट च स्पृशति]

लक्ष्मणः—[किञ्चित् सहर्षं स्वगतम्] जाने पुनरपि प्रत्यागतमिव जीवितं त्रिलोकनाथस्य।

वसिष्ठः—दिष्टया प्रत्यापन्नचेतनो रामभद्रः! तथाह्यस्य

भवति विततश्वासा नासा, प्रसन्न मुरःस्थलं,
हृदय मपिच स्निग्धं, चक्षु र्निजप्रकृतौ स्थितम्।
तदनु वदनं मूर्च्छाच्छेदात् प्रसादि विराजते,
परिगत मिव प्रारम्भे ऽह्नः श्रिया सरसीरुहम्॥

रामः—[सहर्ष चक्षु रुन्मील्य] हन्त भोः किमेतत्!

प्रद्योतनं नु हरिचन्दनपल्लवानां,
निष्पीडितेन्दुकरकन्दलजो नु सेकः।
आतप्तजीवितततरोः परितर्पणो मे
सञ्जीवनौषधिरसो नु हृदि प्रसिक्तः॥

स्पर्शः पुरा परिचितो नियतं स एषः,
संजीवनश्च मनसः परिमोहणश्च ।
सन्तापजां सपदि यः प्रतिहत्य मूर्च्छां
आनन्दनेन जडतां पुन रातनोति ॥

सीता—[ससाध्वसकरुणं किञ्चि दपसृत्य] एतावदेव इदानीं मे बहुतरम् ।

रामः—[उपावश्य] न खलु वत्सलया सीतादेव्या अभ्युपपन्नोऽस्मि ?

सीता—[स्वगतं] नमो नमः अपूर्वपुण्यजनितदर्शनेभ्यः आर्यपुत्रचरणकमलेभ्यः । [इति सतृष्णं पश्यात]

अरुन्धती—[सस्नेहास्रं पारिष्वज्य]

विलुलित मतिपूरै र्बाष्प मानन्दशोक-
प्रभव मवसृजन्ती तृष्णयोत्तानदीर्घा ।

स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते
धवलबहलमुग्धा दुग्धकुल्येव दृष्टिः॥

रामः—[उत्तिष्ठन् सहर्षकरुणाद्भुतं विलोक्य] अये! कथ मियं देवी जानकी! यैषा

वसने परिधूसरे वसाना
नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला
मम दीर्घं विरहव्रतं बिभर्ति।

[सर्वतोऽवलोक्य, सलज्जम्] भोः किमेतत्! अम्बा! अरुन्धती! भगवान् मैत्रावरुणिः! सर्वेच प्रहृष्यन्तः ऋष्यशृङ्गशान्तासमेता गुरवः! [उपेत्य] एषोऽहं निर्लज्जः प्रणमामि वः।

गुरुवर्गः—वत्स! रामभद्र!! विगतशोकश्चिरं महीं पालयः!!! [गायति]

[पल्लवी]

जय! जानकीरमण । जय ! भूमिभरहरण ॥

[अनुपल्लवी]

जय! भरतनुतरचण । जय! लोकशरण॥जय॥

[चरणाः]

जय ! देवमुनिगीत। जय ! विजयपरिवीत ।
जय ! कुशलवतात । जय ! लब्धसीत॥जय॥

जय ! दीनजननाथ । जय ! बाधिताऽबोध ।
जय! सत्यसुखबोध । जय! दिव्ययोध॥जय॥

जय ! मैथिलीलोल । जय ! विप्रसुतपाल ।
जय! देवनुतलील । जय! दैत्यकाल ॥जय॥

जय! हृद्गुहावास । जय! चन्द्रदरहास ।
जय! सुगुणविलास । जय! चारुनास॥जय॥

अरुन्धता—वत्स ! एषा भगीरथगृहदेवता सुप्रसन्ना गङ्गा।

भागीरथी—जगत्पते! रामचन्द्र! स्मर्यता मालेख्यदर्शने मां प्रत्यात्मनो वचनं, यथा "सा त्व मम्ब! स्नुषाया मरुन्धतीव सीतायां शिवा नुध्यानपराभव" इति। तत्र अनृणाऽस्मि जाता।

अरुन्धती—इयं ते श्वश्रू र्भगवती वसुन्धरा।

पृथिवी—उक्तं च पूर्व मायुष्मता वत्सा-त्यागे, यथा "भगवति वसुन्धरे! श्लाघ्यां दुहि-तर मवेक्षस्व जानकीम्!" इति। त दधुना कृतवच-नाऽस्मि प्रभो र्वत्सस्य।

रामः—कथं! कृतमहापराधो भगवतीभ्या मनुकम्पितोऽस्मि! देव्यौ, प्रणमामि वाम्।

भागीरथीपृथिव्यौ—समवधत्त भो स्त्रिजगच्च-राणि भूतानि !

वस्वर्करुद्रसहितः स्वय मेष साक्षाद्

वृद्धश्रवाः समभिनन्दति साधु साध्वीम्।

अग्निप्रवेशपरिनिर्गमशुद्धभावां

सीतां रघूत्तम! भवत्स्थिति माद्रियस्व॥

लक्ष्मणः—कथ मेते दिवौकसोऽपि दशक-न्धरगृहनिवासकौलीनशङ्कापनुत्यै कृतपावकप्रवे-शनिर्गमनां सीतादेवी मभिनन्दन्ति। अहह!।

पतिव्रतामयं ज्योति र्ज्योतिषा ऽन्येन शोध्यते।

इद माश्चर्य मथवा लोकस्थित्यनुवर्तनम्॥

कौसल्या—[सरोषं] आः! कोऽय मग्निर्नाम अस्सत्कुलवधूपरिशोधने?

ऋष्यशृङ्गः—एव मेतत्।अग्निरिति वत्सां प्रति परिलघून्यक्षराणि। सीतेत्येव पर्याप्तम्। हा! वत्से जानकि!

शिशुर्वा शिष्या वा यदसि मम,तत्तिष्ठतु तथा,
विशुद्धे रुत्कर्ष स्त्वयि तु मम भक्ति द्रढयति।
शिशुत्वं स्त्रैणं वा भवतु, ननु वन्द्याऽसिजगतां,
गुणाः पूजास्थानं गुणिषु,नच लिङ्गं न च वयः॥

सर्वे—प्रियं नः ! प्रियं नः !!

अरुन्धती—भो भोः ! पौरजानपदाः ! इय मधुना भगवतीभ्यां जाह्नवीवसुन्धराभ्या मेवं प्रशस्यमाना, मम अरुन्धत्याः समर्पिता, पूर्वं च भगवता वैश्वानरेण निर्णीतपुण्यचारित्रा, सब्रह्मकैश्च देवैः संस्तुता सावित्रकुलवधूः देवयजन सम्भवा सीतादेवी परिगृह्यता मिति कथं भवन्तो मन्यन्ते ?

सर्वे—[अञ्जलिं बध्वा] देवि ! चारित्रदेवते । प्रसीद ! प्रसीद !! क्षम्यता मयं महापराधः पौर जानपदानाम् । [इति सीतां प्रणमन्ति]

सीता—[नम्रमुखी तिष्ठति]

लक्ष्मणः—हन्त ! सर्वेऽपि पौरजानपदाः, एवं भगवत्या अरुन्धत्या प्रतिबोधिताः, आर्यां नमस्कुर्वन्ति । हन्त ! सर्वेच लोकपालाः पुष्प-वृष्टिभि रुपातिष्ठन्ते ।

वसिष्ठः—वत्स ! रामभद्र !

इमां गृह्णीष्व वैदेहीं सर्वलोकनमस्कृताम् ।
अपापा मक्षतां शुद्धचारित्रां पुरुषोत्तम ॥

अपिच,

इमां भगवतीं लक्ष्मीं जानीहि जनकात्मजाम् ।
सा भवन्त मनुप्राप्ता मानुषीं तनु मास्थिता ॥

रामः—यथा भगवान् आदिशति ।

अरुन्धती—जगत्पते रामचन्द्र !

नियोजय यथाधर्मं प्रियां त्वं धर्मचारिणीम् ।
हिरण्मय्याः प्रतिकृतेःपुण्यप्रकृति मध्वरे ॥

सीता—[स्वगतं] जानात्यार्यपुत्रः सीतादुःखं प्रमार्ष्टुम् ।

रामः—यथा भगव त्यादिशति ।

वसिष्ठः—वत्से जानकि,मा भैषीः ! विदिता र्थाऽसि, सहधर्मचारिणं प्रति न त्वया मन्युः कर्तव्यः । अय मिह त्वत्समागममेव प्रतीक्षमाणः सलक्ष्मणो रामभद्र स्तिष्ठति ।

सीता—[स्वगतं] मनोरथः खलु मे भणितो भगवता । [प्रकाशं] एषाऽस्मि मन्दभागिनी गुरुजनायासकारिणी संवृत्ता ।

रामः—अयि ! प्रिये जानकि ! किमित्यौदासीन्यं भजसि ?

त्वदालापाः कर्णे मम नवसुधाशीकरमयाः,
तव स्पर्शोऽप्यङ्गे शिशिराशिशिरश्चन्दनरसः।

शरज्ज्योत्स्नापूरः तव वपु रिदं मे नयनयोः,
कथं ते कल्याणि! क्षणमपि सहे हन्त विरहम्॥

अरुन्धती—अयि चारित्रदेवते, किमद्याऽपि रामभद्रसकाशात् प्रत्यादेशं बिभेषि ?

लोपामुद्रा, ऽनसूया, ऽहं, इति तिस्रः,त्वयासह।
पतिव्रता श्वतस्रोऽत्र सन्तु जानकि ! सांप्रतम् ॥

सीता—तर्हि महान् प्रसादः । [इति रामस्य पादयोः प्रणमति]

रामः—[सीतां स्वहस्तेन उत्थाप्य] देवि! प्रसीद, प्रसीद ।

सुतनु ! हृदयात् प्रत्यादेशव्यलीक मपैतु ते ,
किमपि मनसः संमोहो मे तदा बलवा नभूत्।
प्रबलतमसा मेवंप्रायाः शुभेषु हि वृत्तयः,
स्रजमपि शिर स्यन्धः क्षिप्तां धुनोत्यहिशङ्कया॥

सीता—आर्यपुत्र! स एवेदानी मसि त्वम् ।

[इत्यश्रूणि मुञ्चति]

रामः—[सीतां परिष्वजन्]

मोहान् मया सुतनु ! पूर्व मुपेक्षित स्ते

यो बाष्पबिन्दु रधरं परिबाधमानः।

तं ताव दाकुटिलपक्ष्मविलग्न मद्य

बाष्पं प्रमृज्य विगतानुशयो भवेयम् ॥

[इति यथोक्त मनुतिष्ठति]

सीता—जयतु जय त्वार्यपुत्रः । [इत्यर्धोक्ते बाष्पकण्ठी विरमति]

रामः—सुन्दरि !

बाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया ।

य त्ते दृष्ट मसंस्कारपाटलोष्ठपुटं मुखम् ॥

सीता—प्रत्युज्जीविताऽस्मि। [इति रामं सस्नेह मालिङ्गति]

लक्ष्मणः—कृतार्थोऽस्मि ।

कौसल्या—[सस्नेहकौतुकस्मितं निर्वर्ण्य]

सस्वेदरोमाञ्चितकम्पिताङ्गी,
जाता प्रियस्पर्शसुखेन वत्सा ।
मरुन्नवाम्भःप्रविधूतासिक्ता
कदम्बयष्टिः स्फुटकोरकेव ॥

लक्ष्मणः—[सहर्षं, स्वगतं]

कनकनिकषभासा सीतयाऽऽलिङ्गिताङ्गो
नवकुवलयदामश्यामवर्णाभिरामः ।
अभिनव इव विद्युन्मण्डितो मेघखण्डः
शमयतु मम तापं सर्वतो रामभद्रः ॥

आर्ये ! एष निर्लज्जो लक्ष्मणः प्रणमति ।

सीता—वत्स ! ईदृशोऽपि चिरं जीव ।

अरुन्धती—भगवन् वाल्मीके! उपनीयेता मिमौ सीतागर्भसम्भवौ रामभद्रस्य कुशलवौ ।

रामलक्ष्मणौ—दिष्ट्या! तथैव तत्।[इति परस्पर मवलोकयतः]

कुशलवौ—अहो! किं रामायणकथानायका विमावेव जानकीरघुनायका वावयो र्मातापितरौ!

[ततः प्रविशति जनकेनाऽनुगम्यमानो वाल्मीकिः]

वाल्मीकिः—[सहर्ष]

ददतु तरवः पुष्पै रर्घ्यं फलैश्च मधुश्च्युतः
स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः
कल मविरळं रत्युत्कण्ठाः क्वणन्तु शकुन्तयः,
पुन रय मिमां देवो देवीं स्वयं समुपेयिवान्॥

वत्सौ कुशलवौ, इत इत आगच्छतम् । एष, रघुपतिः पिता युवयोः, लक्ष्मणः कनिष्ठतातः।

सीतादेवी जननी; अयं च राजर्षि र्जनको मातामहः।

कुशलवौ—अहो! धन्यौ स्वः! धन्यौ स्वः!!

रामः—भगवन्, एष निर्लज्जः क्षिप्रकारी रामः प्रणमति।

वाल्मीकिः—[बाहु मुद्यम्य]

जय! जय!! जय!!! राम, त्वत्कळत्रं पवित्रं,
वय मधिगतवन्तः, साक्षिणो लोकपालाः।
अमितविनयविद्यावीर्यवन्तौ सुतौ ते,
कुलविपुलविभूषां जानकी ते करोतु॥

वसिष्ठः—रामभद्र! सत्य माह भगवान् वाल्मीकिः। न हीद मन्यथा मन्तव्यम्।

आविर्भूतज्योतिषां ब्राह्मणानां
ये व्याहारा स्तेषु मा संशयो भूत्।

भद्रा ह्येषां वाचि लक्ष्मी र्निषक्ता,
नैते वाचं विप्लुतां व्याहरन्ति ॥

रामः—[वाल्मीकि मभिगम्य, सविनयं] अनुगृहीताः स्मः । भगवता कृतसंस्कारयो रायुष्मतोः सर्व मनयो र्वय माशास्महे ।

सीता—भगवन्, प्रणमामि ।

वाल्मीकिः—वत्से ! लोकोत्तरेण, अनेन तव-चारित्रेण रामभद्रसदृशा विमौ पुत्रौ प्राप्य संवत्सरसहस्रं भूयाः!

यावत् फणीन्द्रशिरासि क्षितिचक्र मेतद्,
यावत् पुन र्ग्रहगणैः शबलं विहायः ।
वैदेहि ! ताव दमलो भुवनेषु पुण्यः
श्लोकः प्रशस्तचरितै रुपगीयतां ते ॥

कुशलवौ—[रामलक्ष्मणा वुपसृत्य] तातौ ! कुश-

लवा वभिवादयेते । आवयो र्दुर्योगं चपलतां च क्षन्तु मर्हथः।

रामलक्ष्मणौ—[निर्भरमालिङ्गय] ननु वत्सौ। पुण्यैः प्राप्तौ स्थः। दुर्योगोऽपि व्यतिक्रमकृतः कान्त एव।

वसिष्ठः—नन्वय मलङ्कारः क्षत्रस्य!

न तेज स्तेजस्वी प्रसृत मपरेषां प्रसहते,
स तस्य स्वोभावः,प्रकृतिनियतत्वा दकृतकः।
मयूखैरश्रान्तं तपति यदि देवो दिनकरः,
कि माग्नेयो ग्रावा निकृत इव तेजांसि वमति॥

कुशलवौ— तर्हि, अनुगृहीतौ स्वः।

सीता—एहि, जातकुश! एहि, जात लव!! चिरस्य परिष्वजेथां पुनर्जन्मान्तरगतां जननीम्।

कुशलवौ—[तथा कृत्वा] धन्यौ स्वः।

वाल्मीकिः—राजर्षे ! सीरध्वज ! क्षम्यता मिदानीं अपराधो रामभद्रस्य ।

सीता—[सहर्षकरुणाद्भुतं विलोक्य, स्वगतं] अम्महे! कथं तातः ? कथ मन्यादृश एव दृश्यते ।

जनकः—भगवन् वाल्मीके ! नन्वहं जानाम्येव सीतास्नेहं रामभद्रस्य ।

क्षमायाः स क्षेत्रं, गुणमणिगणाना मपि खनिः,
प्रपन्नानां मूर्तः सुकृतपरिपाको जनिमताम् ।
कृपारामो रामो बहि रिह दृशोपास्यत इति
प्रमोदा द्वै तस्या प्युपरि परिवर्तामह इमे ॥

सीता—हन्त ! ईदृशे महोत्सवदिवसे तातोऽप्यत्रै वायात इति निमग्नाऽस्म्यानन्दसागरे । [उपसृत्य] तात ! दारकाभ्यां सहिता तव पादवन्दनं करोमि [इति पादयोः प्रणिपतति]

जनकः—[सहर्षमुत्थाप्य] वत्से ! सततं भर्तुर्बहुमता भव !

महेश्वरसमो भर्त्ता, स्कन्देभास्यसमौ सुतौ ।
आशी रन्या न ते योग्या, पार्वत्या सदृशीभव॥

कुशलवौ—[उपसृत्य] मातामह ! इमौ कुशलवा वभिवादयेते ।

जनकः—एहि ! वत्सौ ! [समालिङ्गय] अवश्यं दीर्घायुषौ उभयकुलनन्दनौ भवतम् ।

चक्षुषां स्वस्वसमये संस्कारत्वं समाप्नुताम् ।
वत्सौ नयेन धर्मेण ज्ञानेन च पुरस्कृतम् ॥

रामः—[स्वगतं, सोल्लासं] अहो ! कथ मयं तात जनकः !

यद्दर्शनात् किम प्येवं द्रवभिवति मे मनः ।
राधासुधाकरालोका दिन्दुकान्तोपलो यथा॥

अहो ! महात्मनो वात्सल्यपरतन्त्रता, यन् महापराधिनमपि मा मनुकम्पते । कथं नु खल्वयं द्रष्टव्यः?[कथञ्चि दुपसृत्य, प्रकाशं]हा तात!एषोऽहमति निर्घृणो रामः प्रणमति ।

जनकः--[सरभसं पादपतितं राम मुत्थाप्य] एह्येहि। वत्स !

अनुभावयति ब्रह्मानन्दसाक्षात्क्रिया! मिव ।
स्पर्श स्तेऽद्य वराम्भोजप्रस्फुरन्नालकर्कशः॥

[निर्भरमालिङ्ग्य] तद् वत्स रामभद्र! स्वापत्यदारसहित श्चिरं महीमण्डलं परिपालय ।

आपन्नवत्सल, जगज्जनतैकबन्धो,
विद्वन्मरालकमलाकर, रामचन्द्र ।
जन्मादिकर्मविधुरैः सुमनश्चकोरै
राचम्यतां तव यशः शरदां सहस्रम् ॥

लक्ष्मणः तात वन्दे ।!

जनकः—वत्स! ज्येष्ठभ्रातु रभिमतो भव ।

[नेपथ्ये दुन्दुभिध्वनिः]

सर्वे—भोः किमेतत्? [सविस्मय माकर्णयन्ति]

वाल्मीकिः—[उत्थाय, अवलोक्य च] अये! उत्खातलवणो मधुरेश्वरः प्राप्तः।

लक्ष्मणः—सानुषङ्गाणि कल्याणानि ।

रामः—सर्वमिद मनुभवन्नपि न प्रत्येमि, यद्वा प्रकृति रिय मभ्युदयानाम् ।

वाल्मीकिः—रामभद्र! उच्यतां, किं ते भूयः प्रिय मुपकरोमि ।

अवनि रमरसिन्धुः सार्ध मस्माद्विधाभिः
स च कुलपति राद्य श्छन्दसां यः प्रयोक्ता ।
स च मुनि रनुयातारुन्धतीको वासिष्ठः,
त्वयि वितरतु भद्रं भूयसे मङ्गळाय ॥

रामः—अतः परमपि प्रियमस्ति ? तथापी-
दमस्तु !

पाप्मभ्यश्च पुनातु, वर्धयतु च श्रेयांसि सेयं कथा,
मङ्गळयाच्च मनोहराच्च जगतो मातेव गङ्गेव च।
तामेतां परिभावय न्त्वाभिनयै र्विन्यस्तरूपां बुधाः
शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणी मिमाम्॥

[भरतवाक्यम्]

[सर्वे सङ्गम्य सार्वभौमीयगीतिं गायन्ति]

विजयतां! सदा। विजयतां! सदा॥
विजयतां! सदा जयार्जि--पञ्चमो मुदा।
विलायतांश्च भारतांश्च-पाति यो ऽभिदा॥

जीवता नृतः। जीवता नृतः॥
जीवतात्! कळत्र पुत्र-मित्रसंवृतः।
जीवलोकदुःखहरण-कल्पितव्रतः॥ विजयतां॥

स्वस्ति! ते प्रभो । स्वस्ति! ते प्रभो ॥
स्वस्ति ! ते भूतानयाधि-राज्यमाविभो ।
स्वस्वधर्मतो ऽव न श्च-सार्वभौम भो ॥ विजयतां॥

राजतां समः । राजतां समः ॥
रामव न्निजप्रजानु-रञ्जनक्षमः ।
रामव न्निरस्तसर्व-शत्रुंसभ्रमः ॥ विजयतां ॥

[इति निष्क्रान्ताः सर्वे]